Devi Khadgamala Stotram

श्रीविद्याखड्गमाला (शुद्धशक्तिसंबुद्ध्यन्तमाला)

MALA · माला

1 ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुन्दरि

Aim hrim shrim Om namas Tripurasundari

2 हृदयदेवि शिरोदेवि शिखादेवि कवचदेवि नेत्रदेव्यस्त्रदेवि

Hridaya devi shiro devi shikha devi kavacha devi netra devy astra devi

3 कामेश्वरि भगमालिनि नित्यक्लिन्ने भेरुण्डे वह्निवासिनि महावज्रेश्वरि शिवादूति त्वरिते कुलसुन्दरि नित्ये नीलपताके विजये सर्वमङ्गले ज्वालामालिनि चित्रे महानित्ये

Kameshvari Bhagamalini Nityaklinne Bherunde Vahnivasini Mahavajreshvari Shivaduti Tvarite Kulasundari Nitye Nilapatake Vijaye Sarvamangale Jvalamalini Chitre Mahanitye

4 परमेश्वरपरमेश्वरि मित्रीशमयि षष्ठीशमय्युड्डीशमयि चर्यानाथमयि लोपामुद्रामय्यगस्त्यमयि कालतापनमयि धर्माचारमयि मुक्तकेशीश्वरमयि दीपकलानाथमयि विष्णुदेवमयि प्रभाकरदेवमयि तेजोदेवमयि मनोजदेवमयि कल्याणदेवमयि रत्नदेवमयि वासुदेवमयि

Parameshvara parameshvari Mitrisha mayi Shashthisha mayy Uddisha mayi Charyanatha mayi Lopamudra mayy Agastya mayi Kalatapana mayi Dharmachara mayi Muktakeshishvara mayi Dipakalanatha mayi Vishnudeva mayi Prabhakaradeva mayi Tejodeva mayi Manojadeva mayi Kalyanadeva mayi Ratnadeva mayi Vasudeva mayi

5 श्रीरामानन्दमय्यणिमासिद्धे लघिमासिद्धे महिमासिद्ध ईशित्वसिद्धे वशित्वसिद्धे प्राकाम्यसिद्धे भुक्तिसिद्ध इच्छासिद्धे प्राप्तिसिद्धे सर्वकामसिद्धे

Shri Ramananda mayy Anima siddhe Laghima siddhe Mahima siddha Ishitva siddhe Vashitva siddhe Prakamya siddhe Bhukti siddha Ichchha siddhe Prapti siddhe Sarvakama siddhe

6 ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि माहेन्द्रि चामुण्डे महालक्ष्मि

Brahmi Maheshvari Kaumari Vaishnavi Varahi Mahendri Chamunde Mahalakshmi

7 सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्ववशंकरि सर्वोन्मादिनि सर्वमहाङ्कुशे सर्वखेचरि सर्वबीजे सर्वयोने सर्वत्रिखण्डे त्रैलोक्यमोहनचक्रस्वामिनि प्रकटयोगिनि

Sarva sankshobhini sarva vidravini sarvakarshini sarva vashankari sarvonmadini sarva mahankushe sarva khechari sarva bije sarva yone sarva trikhande trailokya mohana chakra svamini prakata yogini

8 कामाकर्षिणि बुद्ध्याकर्षिण्यहंकाराकर्षिणि शब्दाकर्षिणि स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गन्धाकर्षिणि चित्ताकर्षिणि धैर्याकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिण्यात्माकर्षिण्यमृताकर्षिणि शरीराकर्षिणि सर्वाशापरिपूरकचक्रस्वामिनि

Kamakarshini buddhyakarshiny ahankarakarshini shabdakarshini sparshakarshini rupakarshini rasakarshini gandhakarshini chittakarshini dhairyakarshini smrityakarshini namakarshini bijakarshiny atmakarshiny amritakarshini sharirakarshini sarvasha paripuraka chakra svamini

9 गुप्तयोगिन्यनङ्गकुसुमेऽनङ्गमेखलेऽनङ्गमदनेऽनङ्गमदनातुरेऽनङ्गरेखेऽनङ्गवेगिन्यनङ्गाङ्कुशेऽनङ्गमालिनि सर्वसंक्षोभणचक्रस्वामिनि गुप्ततरयोगिनि

Gupta yoginy Ananga kusume-nanga mekhale-nanga madane-nanga madanature-nanga rekhe-nanga veginy Ananganku shе-nanga malini sarva sankshobhana chakra svamini guptatara yogini

10 सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लादिनि सर्वसंमोहिनि सर्वस्तम्भिनि सर्वजृम्भिणि सर्ववशंकरि सर्वरञ्जिनि सर्वोन्मादिनि सर्वार्थसाधिनि सर्वसंपत्तिपूरणि सर्वमन्त्रमयि सर्वद्वन्द्वक्षयंकरि सर्वसौभाग्यदायकचक्रस्वामिनि संप्रदाययोगिनि

Sarva sankshobhini sarva vidravini sarvakarshini sarvahladini sarva sammohini sarva stambhini sarva jrimbhini sarva vashankari sarva ranjini sarvonmadini sarvartha sadhini sarva sampatti purani sarva mantramayi sarva dvandva kshayankari sarva saubhagya dayaka chakra svamini sampradaya yogini

11 सर्वसिद्धिप्रदे सर्वसंपत्प्रदे सर्वप्रियंकरि सर्वमङ्गलकारिणि सर्वकामप्रदे सर्वदुःखविमोचिनि सर्वमृत्युप्रशमनि सर्वविघ्ननिवारिणि सर्वाङ्गसुन्दरि सर्वसौभाग्यदायिनि सर्वार्थसाधकचक्रस्वामिनि कुळोत्तीर्णयोगिनि

Sarva siddhi prade sarva sampat prade sarva priyankari sarva mangala karini sarva kama prade sarva duhkha vimochini sarva mrityu prashamani sarva vighna nivarini sarvanga sundari sarva saubhagya dayini sarvartha sadhaka chakra svamini kulottirna yogini

12 सर्वज्ञे सर्वशक्ते सर्वैश्वर्यप्रदे सर्वज्ञानमयि सर्वव्याधिविनाशिनि सर्वाधारस्वरूपे सर्वपापहरे सर्वानन्दमयि सर्वरक्षास्वरूपिणि सर्वेप्सितप्रदे सर्वरक्षाकरचक्रस्वामिनि निगर्भयोगिनि

Sarvajne sarva shakte sarvaishvarya prade sarva jnanamayi sarva vyadhi vinashini sarvadhara svarupe sarva papa hare sarvanandamayi sarva raksha svarupini sarvepsita prade sarva raksha kara chakra svamini nigarbha yogini

13 वशिनि कामेश्वरि मोदिनि विमलेऽरुणे जयिनि सर्वेश्वरि कौळिनि सर्वरोगहरचक्रस्वामिनि रहस्ययोगिनि

Vashini Kameshvari Modini Vimale-rune Jayini Sarveshvari Kaulini sarva roga hara chakra svamini rahasya yogini

14 वाणिनि चापिनि पाशिन्यङ्कुशिनि महाकामेश्वरि महावज्रेश्वरि महाभगमालिनि महाश्रीसुन्दरि सर्वसिद्धिप्रदचक्रस्वामिन्यतिरहस्ययोगिनि

Vanini chapini pashiny ankushini Mahakameshvari Mahavajreshvari Mahabhagamalini Mahashrisundari sarva siddhi prada chakra svaminy atirahasya yogini

15 श्रीश्रीमहाभट्टारिके सर्वानन्दमयचक्रस्वामिनि परापररहस्ययोगिनि

Shri Shri maha bhattarike sarvanandamaya chakra svamini parapara rahasya yogini

16 त्रिपुरे त्रिपुरेशि त्रिपुरसुन्दरि त्रिपुरवासिनि त्रिपुराश्रीस्त्रिपुरमालिनि त्रिपुरासिद्धे त्रिपुराम्ब महात्रिपुरसुन्दरि

Tripure Tripureshi Tripurasundari Tripuravasini Tripurashris Tripuramalini Tripurasiddhe Tripuramba Mahatripurasundari

17 महामहेश्वरि महामहाराज्ञि महामहाशक्ते महामहागुप्ते महामहाज्ञप्ते महामहानन्दे महामहास्पन्दे महामहाशये महामहाश्रीचक्रनगरसम्राज्ञि नमस्ते त्रिः स्वाहा श्रीं ह्रीं ऐं॥

Maha maheshvari maha maharajni maha maha shakte maha maha gupte maha maha jnapte maha mahanande maha maha spande maha mahashaye maha maha Shrichakra nagara samrajni namaste trih svaha shrim hrim aim.

Text checked against: Srividya Khadgamala, ed. C. Sankara Rama Sastri, Sri Balamanorama Series No. 53, Sri Balamanorama Press, Madras 1954 (first of the fifteen malas: Shuddha-shakti-sambuddhyanta-mala). Meanings, audio and all scripts at nityapaath.com/khadgamala/